संस्कृतवार्ता:

दिनाङ्क:- 06.09.2025

प्रात: - 06:55

<u>सीतारामन्/वस्तुसेवाकरः</u>

केन्द्रीय-वित्त-मन्त्री निर्मला-सीतारामन् उक्तवती यत् नूतना वस्तुसेवाकर-व्यवस्था नागरिकाणाम् उपभोगं संवर्धयिष्यति आर्थिकव्ययं च न प्रभावयिष्यति इति। एकस्या: नैज-वार्ता-वाहिन्याः साक्षात्कारे श्रीमती सीतारामन् अवदत् यत् प्रतिशतं नवनवति-मितेषु वस्तुषु सेवासु च सम्प्रति शून्यम् अथवा पञ्चतः अष्टादश-प्रतिशत-मितः एव करः प्रदेयः भविष्यति। सा अवोचत् यत् एषः प्रथम: क्षतिपूर्त्यवसरः विद्यते यतोहि, वस्तुसेवाकर-विषये समग्र-प्रस्तावः केन्द्रेण अभ्युपगतः अस्ति। मन्त्री अवदत् यत्, शिलातैलं मादकपदार्थाः च वस्तुसेवाकर-क्षेत्रात् बहिः एव भविष्यन्ति। श्रीमती सीतारामन् अवदत् यत् आत्मनिर्भरभारतस्य उद्देश्यं न केवलं देशे सर्ववस्तूनाम् उत्पादनम् अस्ति, अपितु अनिश्चित-वैश्विक-व्यापार-नीतिनाम् आत्मसम्मान-पूर्वकं सम्मुखीकरणम् अपि वर्तते।

<u>वस्तुसेवाकरः</u>

केन्द्रीयप्रशासनेन सद्यः घोषितेषु अनेकेषु विषयेषु वस्तु-सेवा-करस्य न्यूनीकरणेन समाजस्य विभिन्नेषु वर्गेषु सुलभता प्रकल्पिता। स्वातन्त्र्यदिने रक्तदुर्गात् प्रधानमन्त्रिणा नरेन्द्रमोदिना सामान्यजनानां कृते वस्तुसेवाकर-परिष्कारा: घोषिता: आसन्। संशोधनमिदम् मासस्यास्य द्वाविंशति-दिनाङ्कात् प्रवर्तिष्यते। प्रधानमन्त्रिण: दक्षतर-नागरिकानुकूलार्थव्यवस्थायाः निर्माणस्य लक्ष्यं परिपूरयितुं अस्मिन्नेव मासे तृतीयदिनाङ्के वस्तुसेवाकर-परिषदा करमितिं युक्तियुतं विधातुम् अनुमोदितम्। एतै: परिष्कारै: अनेकेषु क्षेत्रेषु करमितिः न्यूनीकृता, यस्मात् कारणात् नागरिकाणां जीवनं सुलभं जातम्। आकाशवाण्या: वार्ताहरै: सह संवादावसरे दिल्लीनिवासी लक्ष्मीनारायण: उक्तवान् यत् इदानीं छात्रा: लाभान्विताः भविष्यन्ति।

<u>पञ्जाबराज्यम्</u>

केन्द्रीयः कृषिमन्त्री शिवराजसिंह-चौहानः अवदत् यत् सः क्षतिविषये विस्तृतं प्रतिवेदनं प्रधानमन्त्रिणे अर्पयिष्यति। एकस्मिन् सामाजिकान्तर्जाल-पटलीये सन्देशे सः अवदत् यत् सङ्कटं अपारम् अस्ति, परञ्च केन्द्रसर्वकारः पञ्जाब-राज्यं सङ्कटात् मोचयितुं अपेक्षितोपायान् करिष्यति।

<u>मॉरिशस-प्रधानमन्त्री</u>

मॉरिशस-देशस्य प्रधानमन्त्री नवीनचन्द्र-रामगुलामः अस्य मासस्य नवतः षोडश-दिनाङ्क-पर्यन्तं भारतस्य राजकीययात्रायां भविष्यति। विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवाल: अवदत् यत् श्रीरामगुलाम-वर्यस्य भारते एतत् प्रथमं वैदेशिक-द्विपाक्षिकं भ्रमणं भविष्यति इति। अस्यां यात्रायां दिल्ली-नगरम् अतिरिच्य मॉरिशस-प्रधानमन्त्री मुम्बई-नगरं, वाराणसीम्, अयोध्यां तिरुपतिं च गमिष्यति इति प्रवक्ता अवदत्।

जयशङ्करः/भूटानम्

विदेशमन्त्री डा.सुब्रह्मण्यम्-जयशङ्करः गतवासरे सायङ्काले नवदिल्ल्यां भूटान-देशस्य प्रधानमन्त्रिणं शेरिङ्ग-तोब्गे-इत्येनं मेलितवान्। एकस्मिन् सामाजिकान्तर्जाल-पटलीये सन्देशे श्री-जयशङ्करः अवदत् यत् भारत-भूटानयोः कालानुसारिणी अद्वितीया च सहभागिता निरन्तरं सुदृढा भवति।